# ahalyAkRitaM rAmastotram

# શ્રીરામસ્તોત્રં અહલ્યાકૃતમ્

## Document Information

Text title : ahalyAkRitaM rAmastotram

File name : ahalyaaraamstotra.itx

Category : raama, stotra

Location : doc_raama

Author : ahalyA

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : adhyAtmarAmAyaNa sarga 5, shloka 43-65

Latest update : August 5, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીરામસ્તોત્રં અહલ્યાકૃતમ્

શ્રી ગણેશાય નમઃ ।
અહલ્યોવાચઃ ।
અહો કૃતાર્થાઽસ્મિ જગન્નિવાસ તે પાદાબ્જસંલગ્નરજઃકણાદહમ્ ।
સ્પૃશામિ યત્પદ્મજશઙ્કરાદિભિર્વિમૃગ્યતે રન્ધિતમાનસૈઃ સદા ॥ ૧॥

અહો વિચિત્રં તવ રામ ચેષ્ટિતં મનુષ્યભાવેન વિમોહિતં જગત્ ।
ચલસ્યજસ્રં ચરણાદિવર્જિતઃ સમ્પૂર્ણ આનન્દમયોઽતિમાયિકઃ ॥ ૨॥

યત્પાદપઙ્કજપરાગપવિત્રગાત્રા ભાગીરથી ભવવિરિઞ્ચિમુખાન્પુનાતિ ।
સાક્ષાત્સ એવ મમ દૃગ્વિષયો યદાસ્તે કિં વર્ણ્યતે મમ પુરાકૃતભાગધેયમ્ ॥ ૩॥

મર્ત્યાવતારે મનુજાકૃતિં હરિં રામાભિધેયં રમણીયદેહિનમ્ ।
ધનુર્ધરં પદ્મવિશાલલોચનં ભજામિ નિત્યં ન પરાન્ભજિષ્યે ॥ ૪॥

યત્પાદપઙ્કરજઃ શ્રુતિભિર્વિમૃગ્યં યન્નાભિપઙ્કજભવઃ કમલાસનશ્ચ ।
યન્નામસારરસિકો ભગવાન્પુરારિસ્તં રામચન્દ્રમનિશં હૃદિ ભાવયામિ ॥ ૫॥

યસ્યાવતારચરિતાનિ વિરિઞ્ચિલોકે ગાયન્તિ નારદમુખા ભવપદ્મજાદ્યાઃ ।
આનન્દજાશ્રુપરિષિક્તકુચાગ્રસીમા વાગીશ્વરી ચ તમહં શરણં પ્રપદ્યે ॥ ૬॥

સોઽયં પરાત્મા પુરુષઃ પુરાણ એષઃ સ્વયંજ્યોતિરનન્ત આદ્યઃ । var એકઃ
માયાતનું લોકવિમોહનીયાં ધત્તે પરાનુગ્રહ એષ રામઃ ॥ ૭॥

અયં હિ વિશ્વોદ્ભવસંયમાનામેકઃ સ્વમાયાગુણબિમ્બિતો યઃ ।
વિરિઞ્ચિવિષ્ણ્વીશ્વરનામભેદાન્ ધત્તે સ્વતન્ત્રઃ પરિપૂર્ણ આત્મા ॥ ૮॥

નમોઽસ્તુ તે રામ તવાઙ્ઘ્રિપઙ્કજં શ્રિયા ધૃતં વક્ષસિ લાલિતં પ્રિયાત્ ।
આક્રાન્તમેકેન જગત્ત્રયં પુરા ધ્યેયં મુનીન્દ્રૈરભિમાનવર્જિતૈઃ ॥ ૯॥

જગતામાદિભૂતસ્ત્વં જગત્ત્વં જગદાશ્રયઃ ।
સર્વભૂતેષ્વસંયુક્ત એકો ભાતિ ભવાન્પરઃ ॥ ૧૦॥

ઓંકારવાચ્યસ્ત્વં રામ વાચામવિષયઃ પુમાન્ ।
વાચ્યવાચકભેદેન ભવાનેવ જગન્મયઃ ॥ ૧૧॥

કાર્યકારણકર્તૃત્વફલસાધનભેદતઃ ।
એકો વિભાસિ રામ ત્વં માયયા બહુરૂપયા ॥ ૧૨॥

ત્વન્માયામોહિતધિયસ્ત્વાં ન જાનન્તિ તત્ત્વતઃ ।
માનુષં ત્વાઽભિમન્યન્તે માયિનં પરમેશ્વરમ્ ॥ ૧૩॥

આકાશવત્ત્વં સર્વત્ર બહિરન્તર્ગતોઽમલઃ ।
અસઙ્ગો હ્યચલો નિત્યઃ શુદ્ધો બુદ્ધઃ સદવ્યયઃ ॥ ૧૪॥

યોષિન્મૂઢાઽહમજ્ઞા તે તત્ત્વં જાને કથં વિભો ।
તસ્માત્તે શતશો રામ નમસ્કુર્યામનન્યધીઃ ॥ ૧૫॥

દેવ મે યત્ર કુત્રાપિ સ્થિતાયા અપિ સર્વદા ।
ત્વત્પાદકમલે સક્તા ભક્તિરેવ સદાઽસ્તુ મે ॥ ૧૬॥

નમસ્તે પુરુષાધ્યક્ષ નમસ્તે ભક્તવત્સલ ।
નમસ્તેઽસ્તુ હૃષીકેશ નારાયણ નમોઽસ્તુ તે ॥ ૧૭॥

ભવભયહરમેકં ભાનુકોટિપ્રકાશં
　　કરધૃતશરચાપં કાલમેઘાવભાસમ્ ।
કનકરુચિરવસ્ત્રં રત્નવત્કુણ્ડલાઢ્યં
　　કમલવિશદનેત્રં સાનુજં રામમીડે ॥ ૧૮॥

સ્તુત્વૈવં પુરુષં સાક્ષાદ્રાઘવં પુરતઃ સ્થિતમ્ ।
પરિક્રમ્ય પ્રણમ્યાશુ સાઽનુજ્ઞાતા યયૌ પતિમ્ ॥ ૧૯॥

અહલ્યયા કૃતં સ્તોત્રં યઃ પઠેદ્ભક્તિસંયુતઃ ।
સ મુચ્યતેઽખિલૈઃ પાપૈઃ પરં બ્રહ્માધિગચ્છતિ ॥ ૨૦॥

પુત્રાદ્યર્થે પઠેદ્ભક્ત્યા રામં હૃદિ નિધાય ચ ।
સંવત્સરેણ લભતે વન્ધ્યા અપિ સુપુત્રકમ્ ॥ ૨૧॥

સર્વાન્કામાનવાપ્નોતિ રામચન્દ્રપ્રસાદતઃ ॥ ૨૨॥

બ્રહ્મઘ્નો ગુરુતલ્પગોઽપિ પુરુષઃ સ્તેયી સુરાપોઽપિ વા
માતૃભ્રાતૃવિહિંસકોઽપિ સતતં ભોગૈકબદ્ધાતુરઃ ।
નિત્યં સ્તોત્રમિદં જપન્ રઘુપતિં ભક્ત્યા હૃદિસ્થં સ્મરન્

ધ્યાયન્મુક્તિમુપૈતિ કિં પુનરસૌ સ્વાચારયુક્તો નરઃ ॥ ૨૩॥

॥ ઇતિ શ્રીમદધ્યાત્મરામાયણે અહલ્યાવિરચિતં શ્રીરામચન્દ્રસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

---

*ahalyAkRitaM rAmastotram*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*